International Journal of Creative and Open Research in Engineering and Management
ISSN: 3108-1754 (Online)
Volume 02 Issue 07 Jul-2026 | Impact Factor: 3.5

# नव्यन्यायतर्कपद्धतिः तथा मानसिकस्वास्थ्ये संज्ञानात्मकविकृतयः (Cognitive Biases):एकम् अन्तर्विषयकम् अध्ययनम्

**उर्मिला देवी**
शोधच्छात्रा
(दर्शनविद्याशाखा)
केन्द्रीयसंस्कृतविश्वविद्यालयः, श्रीरघुनाथकीर्तिपरिसरः,
देवप्रयागः, (उत्तराखण्डः)
अणुवाक्सङ्ख्या - urmilachutki959@gmail.com

**How to Cite this Article:**

devi, U. (2026). नव्यन्यायतर्कपद्धतिः तथा मानसिकस्वास्थ्ये संज्ञानात्मकविकृतयः (Cognitive Biases):एकम् अन्तर्विषयकम् अध्ययनम्. International Journal of Creative and Open Research in Engineering and Management, <i>02</i>(7), 1-9. https://doi.org/10.55041/ijcope.v2i7.285

**License:**

This article is published under the terms of the Creative Commons Attribution 4.0 International License (CC BY 4.0), which permits unrestricted use, distribution, and reproduction in any medium, provided the original author(s) and the source are credited.

© The Author(s). Published by International Journal of Creative and Open Research in Engineering and Management.

https://doi.org/10.55041/ijcope.v2i7.285

## शोधसारांशः

अद्यतनकाले मानसिकस्वास्थ्यस्य (Mental Health) संरक्षणं वैश्विकस्तरे महत्त्वपूर्णविषयत्वेन स्वीकृतमस्ति । आधुनिकमनोविज्ञाने मनुष्यस्य निर्णयप्रक्रियायां चिन्तनप्रक्रियायां च याः व्यवस्थिताः त्रुटयः दृश्यन्ते, ताः संज्ञानात्मकविकृतयः (Cognitive Biases) इति कथ्यन्ते। एताः विकृतयः व्यक्तेः निर्णयक्षमताम्, व्यवहारम्, भावनात्मकसन्तुलनञ्च प्रतिकूलतया प्रभायन्ति।

भारतीयदर्शनपरम्परायां नव्यन्यायदर्शनं तर्कस्य, प्रमाणस्य, संशयस्य, निर्णयस्य च सूक्ष्मविश्लेषणाय प्रसिद्धमस्ति । नव्यनैयायिकैः विकसितं तर्कशास्त्रं ज्ञानस्य यथार्थतां परीक्षितुं व्यवस्थितां पद्धतिं प्रदर्शयति। यद्यपि आधुनिकमनोविज्ञाने वर्णितानां संज्ञानात्मकविकृतीनां तथा नव्यन्यायतर्कपद्धतेः प्रत्यक्षसम्बन्धः शास्त्रेषु न दृश्यते, तथापि उभयोः मध्ये दार्शनिकः संवादः सम्भाव्यते।

अस्य शोधलेखस्य प्रमुखोद्देश्यमस्ति यत् नव्यन्यायस्य प्रमाणमीमांसाम्, तर्कपद्धतिम्, हेत्वाभासविचारं च आधुनिकमनोविज्ञानस्य (Cognitive Biases) इत्येतैः सह तुलनात्मकदृष्ट्या परीक्षणम् । अयं शोधः गुणात्मकः (Qualitative), विश्लेषणात्मकः (Analytical), तुलनात्मकश्च अस्ति। अध्ययनस्य आधारभूतस्रोतत्वेन न्यायसूत्रम्, तत्त्वचिन्तामणिः, तर्कसङ्ग्रहः, भाषापरिच्छेदः, लक्षणसङ्ग्रहश्च, आधुनिकमनोविज्ञानसम्बद्धाः समीक्षितशोधलेखाश्च स्वीकृताः ।

अध्ययनात् ज्ञायते यत् नव्यन्यायस्य तर्कपद्धतिः प्रमाणपरीक्षणे, तर्कदोषाणां निरासे, निर्णयस्य सम्यक्त्वे च महत्त्वपूर्णां दार्शनिकदिशां प्रदातुं समर्था वर्त्तते। तथापि एतत् मनोचिकित्सायाः प्रत्यक्षविकल्पः न, अपितु मानसिकस्वास्थ्यविमर्शे भारतीयतर्कपरम्परायाः योगदानस्य दार्शनिकव्याख्या इति मन्तव्यम्।

## कूटशब्दाः

नव्यन्यायः, मानसिकस्वास्थ्यम्, संज्ञानात्मकविकृतयः, प्रमाणम्, तर्कः, संशयः, हेत्वाभासः, अन्तर्विषयकम् अध्ययनम्।

## १. प्रस्तावना

मानवजीवनस्य सर्वाङ्गीणविकासे मानसिकस्वास्थ्यस्य सर्वाधिकं महत्त्वमस्ति। विश्वस्वास्थ्यसङ्गठनस्य (WHO) मतानुसारं मानसिकस्वास्थ्यं केवलं मानसिकरोगाभावः न, अपितु सा अवस्था यत्र मनुष्यः स्वशक्तीनां विकासं करोति, जीवनस्य सामान्यचापान् सम्यक् सहते, समाजे च रचनात्मकयोगदानं दातुं समर्थः भवति।

आधुनिकमनोविज्ञाने प्रतिपाद्यते यत् बहवः मानसिकविकाराः विचारप्रक्रियायाः व्यवस्थितत्रुटिभिः सम्बद्धाः भवन्ति। एताः त्रुटयः संज्ञानात्मकविकृतयः (Cognitive Biases) इति प्रसिद्धाः। तासु Confirmation Bias, Anchoring Bias, Availability Bias, Overgeneralization इत्यादयः प्रमुखाः सन्ति।

भारतीयदर्शनपरम्परायां न्यायदर्शनम्, विशेषतः नव्यन्यायः, यथार्थज्ञानस्य स्वरूपम्, प्रमाणानां प्रामाण्यम्, संशयस्य कारणानि, तर्कस्य प्रयोजनम्, निर्णयस्य प्रक्रियां च सूक्ष्मतया निरूपयति । न्यायसूत्रे स्पष्टतया उक्तम् - **"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[1]"** इति।

तथैव अन्नम्भट्टेन तर्कसङ्ग्रहेऽपि उक्तम् - **"यथार्थानुभवः प्रमा"**[2] इति।

अनेन स्पष्टं भवति यत् यथार्थज्ञानमेव सम्यग्निर्णयस्य मूलम्। यदि ज्ञानं विपरीतम्, अपूर्णं वा भवति, तर्हि तस्मात् उत्पन्नो निर्णयोऽपि विपरीतो भवितुमर्हति । अयं सिद्धान्तः आधुनिकमनोविज्ञाने वर्णितानां Cognitive Biases इत्यस्य अध्ययनाय अपि चिन्तनीयो भवति।

अत अस्मिन् शोधलेखे नव्यन्यायतर्कपद्धतेः तथा आधुनिकसंज्ञानात्मकमनोविज्ञानस्य तुलनात्मकं विश्लेषणं क्रियते, यत् भारतीयज्ञानपरम्परायाः समकालीनमानसिकस्वास्थ्यविमर्शे योगदानं प्रकाशयितुं शक्नुयात्।

---

[1] न्यायसूत्रम् 1.1.3

[2] तर्कसङ्ग्रहः, पृ. सं. 63

## २. पूर्वशोधसमीक्षा (Literature Review)

नव्यन्यायदर्शनं भारतीयतर्कशास्त्रस्य परिष्कृततमं स्वरूपमस्ति। अस्य प्रवर्तकः गङ्गेशोपाध्यायः तत्त्वचिन्तामणि इति ग्रन्थस्य रचनया भारतीयतर्कपरम्परायाः नूतनं युगम् आरब्धवान्। तदनन्तरं रघुनाथशिरोमणिः, मथुरानाथतर्कवागीशः, जगदीशतर्कालङ्कारः, गदाधरभट्टाचार्यश्च नव्यन्यायस्य सूक्ष्मविश्लेषणात्मकपरम्परां समृद्धवन्तः।

अन्नम्भट्टकृतः तर्कसङ्ग्रहः न्यायदर्शनस्य मूलभूतसिद्धान्तान् सरलरूपेण निरूपयति। तत्र प्रमाणम्, प्रमा, संशयः, अनुमानम्, हेत्वाभासाः, इत्यादीनां स्पष्टव्याख्या दृश्यते। विश्वनाथपञ्चाननभट्टाचार्यस्य भाषापरिच्छेदः तथा नरोत्तमभट्टस्य लक्षणसङ्ग्रहोऽपि नव्यन्यायपरम्पराया अध्ययनार्थं महत्त्वपूर्णौ ग्रन्थौ स्तः।

आधुनिकमनोविज्ञाने Daniel Kahneman तथा Amos Tversky इत्येताभ्यां मानवीयनिर्णयप्रक्रियायाः विषये महत्त्वपूर्णानि अनुसन्धानानि कृतानि। ताभ्यां प्रतिपादितं यत् मनुष्यः सर्वदा तर्कसङ्गतं निर्णयं न करोति, अपितु अनेकासु परिस्थितिषु मानसिकसंक्षिप्तमार्गान् (Heuristics) अनुसरति, येषां परिणामस्वरूपेण Cognitive Biases उत्पद्यन्ते।

Aaron T. Beck इत्यनेन प्रतिपादितायां Cognitive Therapy पद्धत्यां विचारविकृतयः मानसिकसमस्यायाः प्रमुखकारणत्वेन स्वीकृताः। आधुनिकमनोविज्ञाने मानसिकस्वास्थ्यस्य संरक्षणार्थं विचारपद्धतेः परीक्षणं विशेषमहत्त्वं प्राप्नोति।

उपलब्धसाहित्यस्य समीक्षया ज्ञायते यत् नव्यन्यायस्य तर्कपद्धति विषये पर्याप्तः शोधः विद्यते, तथा Cognitive Biases विषयेऽपि विपुलम् अनुसन्धानम् उपलब्धम्। किन्तु नव्यन्यायतर्कपद्धतेः मानसिकस्वास्थ्ये संज्ञानात्मकविकृतिभिः सह प्रत्यक्षतुलनात्मकम् अन्तर्विषयकञ्च अध्ययनं अत्यल्पं दृश्यते।

## ३. शोध-अन्तरम् (Research Gap)

उपलब्धग्रन्थानां तथा आधुनिकशोधानां समीक्षया निम्नलिखिताः शोध-अन्तराः ज्ञायन्ते-

**१.** नव्यन्यायतर्कपद्धतेः Cognitive Biases इत्यस्य सह तुलनात्मकमध्ययनमत्यल्पम् अस्ति।

**२.** मानसिकस्वास्थ्यविषये भारतीयतर्कशास्त्रस्य व्यावहारिकप्रासङ्गिकतायाः व्यवस्थितं दार्शनिकविश्लेषणमऽपि अल्पमेव दृश्यते।

**३.** प्रमाणम्, संशयः, तर्कः, हेत्वाभासा इत्येतानां सिद्धान्तानामाधुनिकसंज्ञानात्मकमनोविज्ञानेन सह समन्वितः शोधः विरलोऽस्ति।

© 2026 The Author(s). Published by IJCOPE Journal. Website: https://ijcope.org/

४. भारतीयज्ञानपरम्पराया आधुनिकमानसिकस्वास्थ्यविमर्शे योगदानस्य विश्लेषणं भविष्ये विस्तृतशोधस्य अपेक्षां करोति।

## ४. शोधोद्देश्यानि

अस्य शोधस्य प्रमुखोद्देश्यानि इमानि सन्ति-

**१.** नव्यन्यायतर्कपद्धतेः दार्शनिकस्वरूपस्य विश्लेषणम्।

**२.** संज्ञानात्मकविकृतीनां मनोवैज्ञानिकस्वरूपस्य अध्ययनम्।

**३.** नव्यन्यायतर्कपद्धतेः तथा Cognitive Biases इत्येतयोः तुलनात्मकपरीक्षणम्।

**४.** मानसिकस्वास्थ्ये नव्यन्यायस्य सम्भावितयोगदानस्य मूल्याङ्कनम्।

**५.** भारतीयदर्शनस्य आधुनिकमनोविज्ञानस्य च मध्ये अन्तर्विषयकसंवादस्य सम्भावनानां परीक्षणम्।

## ५. अनुसन्धानपद्धतिः

अयं शोधः गुणात्मकः (Qualitative), तुलनात्मकः (Comparative), विश्लेषणात्मकः (Analytical) च अस्ति।

अध्ययने प्राथमिकस्रोतत्वेन न्यायसूत्रम्, तत्त्वचिन्तामणिः, तर्कसङ्ग्रहः, भाषापरिच्छेदः, लक्षणसङ्ग्रहः इत्यादयः ग्रन्थाः उपयुज्यन्ते । द्वितीयकस्रोतत्वेन आधुनिकमनोविज्ञानसम्बद्धाः समीक्षितशोधलेखाः, पुस्तकानि, मानसिकस्वास्थ्यसम्बद्धाः वैज्ञानिकग्रन्थाश्च उपयुज्यन्ते।

अस्य अध्ययनस्य स्वरूपं दार्शनिक-विश्लेषणात्मकमस्ति। अतोऽत्र नैदानिकपरीक्षणं (Clinical Study) न कृतम्, अपितु भारतीयतर्कपरम्परायाः आधुनिकसंज्ञानात्मकमनोविज्ञानस्य च तुलनात्मकं विश्लेषणं कृतम्।

## नव्यन्यायतर्कपद्धतेः संज्ञानात्मकविकृतिभिः सह तुलनात्मकम् अध्ययनम्

नव्यन्यायदर्शनस्य प्रमुखलक्ष्यं यथार्थज्ञानस्य स्थापना तथा अयथार्थज्ञानस्य निराकरणमस्ति । आधुनिकसंज्ञानात्मकमनोविज्ञानस्य लक्ष्यं मानवीयविचारप्रक्रियायाः व्यवस्थितदोषान् ज्ञात्वा तेषां प्रभावस्य न्यूनी

कर्तुमस्ति । यद्यपि उभयोरुत्पत्तिकालः, प्रयोजनम्, अनुसन्धानपद्धतिश्च भिन्नाः सन्ति, तथापि उभयत्र मानवीयज्ञानप्रक्रियायाः विश्लेषणमेव केन्द्रभूतविषयो दृश्यते।

## ८.१ प्रमाणपरीक्षा तथा Confirmation Bias

Confirmation Bias इति विकृतौ मनुष्यः स्वमतस्य समर्थनं कृत्वा प्रमाणानि एव गृह्णाति, विरोधिनः प्रमाणान् तु नाङ्गीकुर्वन्ति। एषा प्रवृत्तिः निष्पक्षज्ञानस्य बाधिका भवति।

नव्यन्याये तु प्रमाणपरीक्षायाः विशेषमहत्त्वं प्रतिपादितम्। प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्च-एतेषां प्रमाणानां सम्यगवलोकनं विना कश्चिदपि निर्णयः ग्राह्यः न भवति।

अतः नव्यन्यायदृष्ट्या केवलम् एकपक्षीयप्रमाणग्रहणं युक्तिसङ्गतं न भवति । सर्वेषामुपलब्धप्रमाणानां समालोचनात्मकपरीक्षणेन एव यथार्थज्ञानस्य सम्भावना वर्धते।

## ८.२ संशयः तथा निर्णयप्रक्रिया

आधुनिकमनोविज्ञाने शीघ्रनिर्णय अनेकवारं Cognitive Biases इत्यस्य कारणं भवति।

नव्यन्याये संशयः दोषः न, अपितु ज्ञानस्य आवश्यकपूर्वावस्था इति स्वीकृतः। संशयात् अनन्तरं प्रमाणपरीक्षा, तर्कः, निर्णयश्च क्रमशः भवन्ति।

अतः नव्यन्यायदृष्ट्या युक्तिविचारविना कृतः शीघ्रनिर्णयः अयथार्थज्ञानस्य कारणं भवितुमर्हति।

## ८.३ हेत्वाभासाः तथा विचारदोषाः

न्यायशास्त्रे हेत्वाभासाः तर्कदोषरूपेण विवेचिताः सन्ति। यत्र हेतुर्दृष्ट्या साधक इव दृश्यते, किन्तु वस्तुतः साधकः न भवति, तत्र हेत्वाभासः भवति।

आधुनिकमनोविज्ञाने Cognitive Biases अपि विचारप्रक्रियायाः दोषा एव मन्यन्ते।

यद्यपि हेत्वाभासः तार्किकदोषोऽस्ति तथा Cognitive Bias मनोवैज्ञानिकविचारदोषः, तथापि उभयोः मध्ये साम्यं दृश्यते - उभौ अपि व्यक्तेः निर्णयप्रक्रियां विपर्यस्यतः।

## ८.४ व्याप्तिपरीक्षा तथा Overgeneralization

Overgeneralization इत्यस्य अर्थो अल्पदृष्टान्तानाम् आधारेण सार्वत्रिकनिष्कर्षस्य निर्माणम् ।

नव्यन्याये अनुमानस्य आधारः व्याप्तिरस्ति । व्याप्तेः स्थापना बहूनामुदाहरणानाम्, प्रतिदृष्टान्तानाम्, प्रमाणानां च परीक्षणेन भवति ।

अतः एकस्मात् अनुभवात् सार्वत्रिकनिष्कर्षनिर्माणं नव्यन्यायदृष्ट्या ग्राह्यं न भवति ।

## ८.५ तर्कः तथा Anchoring Bias

Anchoring Bias इत्यत्र प्रारम्भिकसूचनाया अत्यधिकः प्रभावः भवति ।

नव्यन्याये तु प्रारम्भिकसूचना अन्तिमनिर्णयस्य पर्याप्तकारणं न भवति । निर्णयः प्रमाणैः, तर्कैः, व्याप्त्या, विरोधिपक्षस्य परीक्षणेन च सम्पन्नः भवेत् ।

अतः नव्यन्यायतर्कपद्धतिः प्रारम्भिकमतग्रहस्य अपेक्षया सम्यग्विमर्शं प्राधान्येन स्वीकरोति ।

## ८.६ मानसिकस्वास्थ्ये नव्यन्यायतर्कपद्धतेः सम्भाविता प्रासङ्गिकता

अत्र विशेषतया ज्ञातव्यं यत् नव्यन्यायः मनोचिकित्साशास्त्रं नास्ति । तेन मानसिकरोगाणां चिकित्सोपायाः प्रत्यक्षतया न निर्दिष्टाः ।

तथापि विचारप्रक्रियायाः समालोचनात्मकपरीक्षणम्, प्रमाणाधारितनिर्णयः, तर्कदोषपरिहारः, संशयस्य समुचितप्रयोगश्च मानसिकस्वास्थ्यसम्बद्धविचारप्रक्रियायां दार्शनिकदृष्ट्या उपयोगिनः स्युः ।

यदि आधुनिकमनोविज्ञानस्य Cognitive Behavioral Therapy (CBT) इत्यादिभिः सह नव्यन्यायतर्कपद्धतेः तुलनात्मकमध्ययनं क्रियेत, तर्हि भारतीयज्ञानपरम्परायाः आधुनिकमानसिकस्वास्थ्यविमर्शे नूतनाः सम्भावना उद्घाटितुं शक्येरन् ।

अतः नव्यन्यायस्य महत्त्वं केवलं ऐतिहासिकतर्कशास्त्रत्वेन न, अपि तु विचारशुद्धेः दार्शनिकमूलाधारत्वेन अपि अवगन्तव्यं भवति ।

## विमर्शः

प्रस्तुताध्ययनात् ज्ञायते यत् नव्यन्यायदर्शनस्य तर्कपद्धतिः तथा आधुनिकसंज्ञानात्मकमनोविज्ञानस्य विचारपद्धतिः भिन्नपरम्परासु विकसिते सत्यपि मानवीयज्ञानस्य विश्लेषणं समानरूपेण महत्त्वपूर्णं मन्येते । नव्यन्यायः यथार्थज्ञानस्य प्राप्तये प्रमाणपरीक्षाम्, संशयम्, तर्कम्, व्याप्तिपरीक्षणं तथा हेत्वाभासविवेचनं प्राधान्येन स्वीकरोति । आधुनिकमनोविज्ञानं तु मनुष्यस्य निर्णयप्रक्रियायां जायमानानां संज्ञानात्मकविकृतीनाम् (Cognitive Biases) अध्ययनं करोति ।

दार्शनिकदृष्ट्या पश्यामश्चेत् उभयोरध्ये उल्लेखनीया समानता दृश्यते । नव्यन्यायस्य प्रमाणाधारितविचारः व्यक्तिं युक्तियुक्तनिर्णयस्य दिशि प्रेरयति, यदा तु संज्ञानात्मकविकृतयः प्रमाणपरीक्षणस्य अभावेन अथवा पूर्वाग्रहवशात् निर्णयदोषान् जनयन्ति । अतः नव्यन्यायस्य विश्लेषणात्मकपद्धतिः आधुनिकसंज्ञानात्मकमनोविज्ञानस्य पूरकदृष्टिरूपेण विचारणीयास्ति ।

तथापि अत्र सावधानता अपेक्षिता । नव्यन्यायः न मनोचिकित्सापद्धतिः, न च मानसिकरोगोपचारस्य प्रत्यक्षोपायः । अतोस्य प्रतिपादनं केवलं दार्शनिके सन्दर्भे एव ग्राह्यम् । आधुनिकमनोविज्ञानस्य चिकित्साविधयः अनुभवजन्यवैज्ञानिकप्रमाणैः समर्थिताः सन्ति, नव्यन्यायस्य योगदानं तु विचारप्रक्रियायाः तार्किकशुद्ध्याम्, प्रमाणाधारितचिन्तने तथा तर्कदोषपरिज्ञाने निहितम् ।

भविष्ये यदि भारतीयदर्शनस्य सिद्धान्ता आधुनिकमनोवैज्ञानिकानुसन्धानैः सह अनुभवजन्यरूपेण परीक्ष्येरन्, तर्हि मानसिकस्वास्थ्यविषये नूतना अन्तर्विषयकशोधदिशाः विकसितुं शक्नुयुः । विशेषतः निर्णयप्रक्रिया, समालोचनात्मकचिन्तनम् (Critical Thinking), संज्ञानात्मकप्रशिक्षणम् (Cognitive Training) इत्यादिषु क्षेत्रेषु नव्यन्यायस्य उपयोगिता अधिकं स्पष्टीकर्तुं शक्यते ।

## १०. उपसंहारः

अस्य अध्ययनस्य आधारेण निष्कर्षतया वक्तुं शक्यते यत् नव्यन्यायतर्कपद्धतिः भारतीयज्ञानपरम्पराया अत्यन्तं विकसितं विश्लेषणात्मकदर्शनमस्ति । अस्य मूलाधारः प्रमाणाधारितज्ञानम्, युक्तियुक्ततर्कः, संशयस्य समुचितप्रयोगः तथा हेत्वाभासानां निरास इति ।

आधुनिकसंज्ञानात्मकमनोविज्ञानं मनुष्यस्य विचारप्रक्रियायां दृश्यन्तेभ्यः व्यवस्थितदोषेभ्यः सावधानतां सूचयति । एते दोषाः मानसिकस्वास्थ्यस्य, निर्णयप्रक्रियायाः तथा व्यवहारस्य उपरि प्रतिकूलप्रभावं कुर्वन्ति । प्रस्तुते शोधे उभयोः परम्परयोः तुलनात्मकाध्ययनात् ज्ञायते यत् नव्यन्यायस्य तर्कशुद्धिः आधुनिकसंज्ञानात्मकविमर्शस्य दार्शनिकपूरकत्वेन ग्राह्या भवितुमर्हति ।

© 2026 The Author(s). Published by IJCOPE Journal. Website: https://ijcope.org/

अध्ययनस्य प्रमुखयोगदानम् एतत् यत् भारतीयतर्कपरम्परां समकालीनमानसिकस्वास्थ्यविमर्शे अन्तर्भावयितुं प्रयत्नः कृतः। एषः प्रयत्नः न चिकित्साविकल्पस्य प्रतिपादनम्, अपितु दार्शनिकदृष्ट्या विचारशुद्धेः महत्त्वस्य पुनराविष्कार इति मन्तव्यः।

अन्ते वक्तुं शक्यते यत् भारतीयदर्शनस्य गम्भीरपरम्परा केवलं ऐतिहासिकमूल्येन न, अपितु आधुनिकवैज्ञानिकविमर्शेष्वपि प्रेरणास्रोतरूपेण ग्राह्या अस्ति। नव्यन्यायस्य तर्कपद्धतिः, यदि आधुनिकमनोविज्ञानस्य अनुसन्धानैः सह समन्विता भवेत्, तर्हि मानसिकस्वास्थ्यविषये नवीनाः अनुसन्धान दिशा उद्घाटयितुं समर्था भविष्यति।

## सन्दर्भग्रन्थसूची

### प्राथमिकसंस्कृतग्रन्थाः

गौतमः - न्यायसूत्रम् (वात्स्यायनभाष्यसहितम्), वाराणसी - चौखम्बा संस्कृत सीरीज।

गङ्गेशोपाध्यायः – तत्त्वचिन्तामणिः, वाराणसी - चौखम्बा विद्याभवन।

अन्नम्भट्टः - तर्कसङ्ग्रहः (दीपिकासहित), वाराणसी - चौखम्बा सुरभारती प्रकाशन।

विश्वनाथपञ्चाननभट्टाचार्यः - भाषापरिच्छेदः (सिद्धान्तमुक्तावलीसहित), वाराणसी चौखम्बा प्रकाशन।

नरोत्तमभट्टः - लक्षणसङ्ग्रहः, वाराणसी चौखम्बा संस्कृत संस्थान।

रघुनाथशिरोमणिः - पदार्थतत्त्वनिर्णयः , वाराणसी चौखम्बा प्रकाशन।

### (ख) आधुनिकग्रन्थाः

1. Beck, A. T. (1979). Cognitive Therapy of Depression. Guilford Press.
2. Beck, A. T., & Clark, D. A. (1997). An information processing model of anxiety. Behaviour Research and Therapy, 35(1), 49–58.
3. Kahneman, D. (2011). Thinking, Fast and Slow. Farrar, Straus and Giroux.
4. Tversky, A., & Kahneman, D. (1974). Judgment under uncertainty: Heuristics and biases. Science, 185(4157), 1124–1131.
5. Ellis, A. (1962). Reason and Emotion in Psychotherapy. Lyle Stuart.
6. World Health Organization. (2022). World Mental Health Report: Transforming Mental Health for All.

7. Matilal, B. K. (1986). Perception: An Essay on Classical Indian Theories of Knowledge. Oxford University Press.

8. Matilal, B. K. (1985). Logic, Language and Reality. Motilal Banarsidass.

9. Ingalls, D. H. H. (1951). Materials for the Study of Navya-Nyāya Logic. Harvard University Press.

10. Ganeri, J. (2011). The Lost Age of Reason: Philosophy in Early Modern India. Oxford University Press.

11. Phillips, S. H., & Tatacharya, N. S. R. (2004). Gaṅgeśa's Tattvacintāmaṇi. American Institute of Buddhist Studies.

12. Nisbett, R. E., & Ross, L. (1980). Human Inference: Strategies and Shortcomings of Social Judgment. Prentice-Hall.

13. American Psychiatric Association. (2022). Diagnostic and Statistical Manual of Mental Disorders (5th ed., text rev.).

14. World Health Organization. Mental Health (Official Publications).

15. Guha, N. (2012). Tarka as Cognitive Validator. Journal of Indian Philosophy.

16. Goekoop, G. (1977). The Logic of Invariable Concomitance in the Tattvacintāmaṇi.

17. Mullatti, L. C. (1977). The Navya-Nyāya Theory of Inference.

18. Halbfass, W. (1992). On Being and What There Is. State University of New York Press.

19. Bronkhorst, J. (2013). The Arrival of Navya-Nyāya Techniques in